
# ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ



Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 17/02/2012 | **Typing Started on** | **H K Srinivasa Rao** |
| 2 | 17/12/2012 | **Typing Ended on** | **H K Srinivasa Rao** |
| 3 | 26/02/2012<br>25/11/2017 | **First Proof Reading**<br>**II Proof Reading** | **M S Venugopal**<br>**Sandesh Kamath B** |

# ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of sri Acharya Madhwa. It is a humble effort to make available this Great work to sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, skype Id: SRKARC6070*

*Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

''ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ''

## ಗ್ರಂಥ ಋಣ:ಆಚಾರ್ಯ ಪ್ರಭಞ್ಜನರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳು

# Table of contents

ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ ........ 1

॥ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥ ........ 2

ಕೃತಜ್ಞತೆಗಳು ........ 2

ಗ್ರಂಥ ಋಣ:ಆಚಾರ್ಯ ಪ್ರಭಞ್ಜನರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳು ........ 2

Table of contents ........ 3

॥ तलवकारोपनिषद्भाष्यम्॥ ........ 4

शान्तिमन्त्रः ........ 4

मङ्गलाचरणम् ........ 4

तलवकारोपनिषत् ........ 4

प्रथमः खण्डः ........ 4

हृषीकेशस्य सर्वेन्द्रियाणिप्रेरकत्ववर्णनम् ........ 4

इन्द्रियाणिप्रेरकस्यापि ब्रह्मण इन्द्रियातीतत्ववर्णनम् ........ 5

तलवकारोपनिषदः पूर्वपीटिका ........ 6

द्वीतीयः खण्डः ........ 6

ब्रह्मणः साकल्येन अज्ञेयत्वप्रतिपादनम् ........ 6

साकल्येनाज्ञेयस्यापि ब्रह्मणो जीवयोग्यतानुसारेण ज्ञेयत्वकथनम् ........ 7

तृतीयः खण्डः ........ 8

ब्रह्मणोऽज्ञेयत्वोपपादिकाऽऽख्यायिका ........ 8

चतुर्थः खण्डः ........ 11

देवतातारतम्यनिरूपणम् ........ 11

ब्रह्मोपदेशः ........ 11

शान्तिमन्त्रः ........ 14

# ॥ तलवकारोपनिषद्भाष्यम्॥

## शान्तिमन्त्रः

आप्यायन्तु ममाङ्गानि वाक् प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि। सर्वं ब्रह्मौपनिषदम्। माऽहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोत्। अनिराकरणमस्त्वनिराकरणं मेऽस्तु। तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु॥ ॐ शान्तिश्शान्तिश्शान्तिः॥

## मङ्गलाचरणम्

अनन्तगुणपूर्णत्वादगम्याय सुरैरपि।
सर्वेष्टदात्रे देवानां नमो नारायणाय ते॥

वैजयन्ते समासीनमेकान्ते चतुराननम्।
विष्णोर्विविदिषुस्तत्वं पर्यपृच्छत् सदाशिवः॥

## तलवकारोपनिषत्

### प्रथमः खण्डः

केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः।
केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति॥1॥

### हृषीकेशस्य सर्वेन्द्रियाणिप्रेरकत्ववर्णनम्

श्रोत्रस्य श्रोत्रं मनसो मनोय द्वाचो ह वाचं स उ प्राणस्य प्राणः।
चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति॥2॥

## इन्द्रियाणिप्रेरकस्यापि ब्रह्मण इन्द्रियातीतत्ववर्णनम्

न तत्र चक्षुर्गच्छति न वाग् गच्छति नो मनः।
न विद्म न विजानीमो यथैतदनुशिष्यात्॥3॥

अन्यदेव तद् विदितादथो अविदितादधि।
इति शुश्रुम पूर्वेषां ये नस्तद्व्या चचक्षिरे॥4॥

यद् वाचाऽनभ्युदितं येन वागभ्युद्यते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपास ते॥5॥

यन्मनसा न मनुते येनाहुर्मनो मतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपास ते॥6॥

यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपास ते ॥7॥

यच्छ्रोत्रेण न श्रुणोति येन श्रोत्रमिदं श्रुतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपास ते॥8॥

यत् प्राणेन न प्राणिति येन प्राणः प्रणीयते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपास ते॥9॥

॥ इति प्रथमः खण्डः॥1॥

भा - वैजयन्ते समासीनमेकान्ते चतुराननम्।
विष्णोर्विविदिषुस्तत्वं पर्यपृच्छत् सदाशिवः॥

## तलवकारोपनिषदः पूर्वपीटिका

यदिदं पुरुषावश्यं तत्र तत्र पतेन्मनः।
केन तत् प्रेरितं याति प्राणः सर्वोत्तमस्तथा॥

चक्षुः श्रोत्रं तथा वाचं को देवो विनियोजयेत्।
इति पृष्टस्तदा ब्रह्मा प्राह देवमुमापतिम्॥

ध्यात्वा नारायणं देवं सर्वाधारमनूपमम्।
सर्वज्ञं सर्वशक्तिं च सर्वदोषविवर्जितम्॥

यः प्राणस्य प्रणेता च चक्षुरादेश्च सर्वशः।
अगम्यः सर्वदेवैश्च परिपूर्णत्वहेतुतः॥

प्राणादीनां प्रणेता च सर्ववेत्ता च सर्वशः।
सर्वोत्तमश्च सर्वत्र स विष्णुरिति धार्यताम्॥

॥ इति प्रथम खण्डभाष्यम्॥

## द्वितीयः खण्डः

## ब्रह्मणः साकल्येन अज्ञेयत्वप्रतिपादनम्

यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपम् ।
यदस्य त्वं यदस्य देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितम्॥1॥

नाहं मन्ये सुवेदेति नाहं नो न वेदेति वेद च।
यो नस्तद् वेद तद् वेद नो न वेदेति वेद च॥2॥

यस्यामतं तस्य मतं मतं यस्य न वेद सः।

अविज्ञातं विजानतां विज्ञातमविजानताम्॥3॥

### साकल्येनाज्ञेयस्यापि ब्रह्मणो जीवयोग्यतानुसारेण ज्ञेयत्वकथनम्

प्रतिबोधविदितं मतममृतत्वं हि विन्दते।

आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्॥4॥

इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः।

भूतेषु भूतेषु विचिन्त्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति॥5॥

॥ इति द्वीतीयः खण्डः॥

भा- यं सम्यङ् नैव जानाति कश्चिन्निरवशेषतः।

सर्वात्मना विजानामीति तु यस्य मतं भवेत्॥

तस्याज्ञातः स भगवान् यो नैवं मन्यते सदा।

ज्ञातस्तस्य तथाऽस्यैव निःशेषमननं कृतम्॥

इति यो मन्यते नास्य मतः स पुरुषोत्तमः।

नातिवेद्यो न चावेद्यस्तस्मात् स परमेश्वरः॥

नेदं जीवस्वरूपं तद् ब्रह्म विष्ण्वाख्यमव्ययम्।

किन्तु यत् ते समीपस्थमास ते विनियामकम्।

तदेव ब्रह्म विद्धि त्वं विष्ण्वाख्यं परमव्ययम्।

नियामकं तद्देवानां मर्त्यानां किमुतोत्तमम्॥

तत्प्रसादं विना जीवे मन्तव्या न प्रवृत्तयः।

किमु जीवस्य तद्भावो न मन्तव्य इतीर्यते॥

॥ इति द्वीतीयखण्डभाष्यम्॥

## तृतीयः खण्डः

### ब्रह्मणोऽज्ञेयत्वोपपादिकाऽऽख्यायिका

ब्रह्मह देवेभ्यो विजिग्ये।

तस्य ह ब्रह्मणो विजये देवा अमहीयन्त।

त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति॥1॥

तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव।

तन्न व्यजानत।

किमिदं यक्षमिति॥2॥

तेऽग्निमब्रुवन्।

जातवेद एतद्विजानीहि किमेतद् यक्षमिति॥3॥

तथेति तदभ्यद्रवत्तमभ्यवदत् कोऽसीति।

अग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति॥4॥

तस्मिंस्त्वयि किं वीर्यमित्यपि।

इदं सर्वं दहेयं यदिदं पृथिव्यामिति॥5॥

तस्मै तृणं निदधावेतद्दहेति।

तदुपप्रेयाय सर्वजवेन तन्न शशाक दग्धुम्।

| |
|---|
| स तत एव निववृते।<br>नैतदशकं विज्ञातुं यदेतद्य यक्षमिति॥6॥ |
| अथ वायुमब्रुवन् वायवेतद्य विजानीहि किमेतद्य यक्षमिति। तथेति॥7॥ |
| तदभ्यद्रवत्तमभ्यवदत् कोऽसीति।<br>वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति॥8॥ |
| तस्मिंस्त्वयि किं वीर्यमित्यपि।<br>इदं सर्वमाददीयं यदिदं पृथिव्यामिति॥9॥ |
| तस्मै तृणं निदधावेतदादत्स्वेति।<br>तदुपप्रेयाय सर्वजवेन।<br>तन्न शशाकादातुम्।<br>स तत एव निववृते।<br>नैतदशकं विज्ञातुं यदेतद्य यक्षमिति॥10॥ |
| अथेन्द्रमब्रुवन्।<br>मघवन्नेतद्य विजानीहि किमेतद्य यक्षमिति।<br>तथेति तदभ्यद्रवत्। तस्मात् तिरोदधे॥ 11॥ |
| स तस्मिन्नेवाऽकाशे स्त्रियमाजगाम बहु शोभमानामुमां हैमवतीम्।<br>तां होवाच किमेतद्य यक्षमिति॥12॥ |
| ॥ इति तृतीयः खण्डः॥ |

| |
|---|
| भा - इत्यत्राख्यायिकां वच्मि श्रुणु तां त्वं महेश्वर।<br>स्थित्वा देवेषु तद् ब्रह्म व्यजयद्दैत्यदानवान्॥ |
| देवेभ्योऽर्थाय विजयं ते देवा मेनिरे स्वकम्।<br>आविष्टा असुरैस्तेषां प्रबोधाय जनार्दनः॥ |
| यक्षरूपः प्रादुरभूदुमाशिवसमन्वितः।<br>ब्रह्मणा चापि सहित एतेभ्योऽपि परो ह्यहम्॥ |
| एतेऽपि मे भृत्यभूताः परिवार्य व्यवस्थिताः।<br>इति ज्ञापयितुं विष्णुः सह तैरप्युपागतः॥ |
| यूयमेतानपि ज्ञातुमशक्ताः किमु मामिति।<br>तज्ज्ञानार्थं हुताशश्च नासिक्यो वायुरेव च॥ |
| इन्द्रश्च क्रमशो जग्मुस्तं ज्ञातुं नैव चाशकन्।<br>तत्रेन्द्रोऽधिकबुद्धित्वात् पृच्छतीति जनार्दनः॥ |
| मत्तः शिवाद् ब्रह्मणश्च श्रोतुं नैवापि शक्तिमान्।<br>इति ज्ञापयितुं तत्र नादृश्यत स केशवः।<br>एषैव ज्ञानदाने ते योग्योमेति व्यदर्शयत्॥ 3॥ |

॥ इति तृतीयखण्डभाष्यम्॥

# चतुर्थः खण्डः

## देवतातारतम्यनिरूपणम्

ब्रह्मेति होवाच।

ब्रह्मणो वा एतद्विजयेऽमहीयध्वमिति।

ततो हैव विदाञ्चकार ब्रह्मेति॥1॥

तस्माद्व वा एते देवा अतितरामिवान्यान् देवान् यदग्निर्वायुरिन्द्रस्ते ह्येतन्नेदिष्ठं पस्पृशुः॥2॥

ते ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति॥3॥

तस्माद्वा इन्द्रोऽतितरामिवान्यान् देवान्।

स ह्येनन्नेदिष्ठं पस्पर्श।

स ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति॥4॥

## ब्रह्मोपदेशः

तस्यैष आदेशो यदेतद्व विद्युतो व्युद्युतदा इति।

न्यमीमिषदा इत्यधिदैवतम्।

अथाध्यात्मम्॥5॥

यदेतद्गच्छतीव च मनोऽनेन वै तदुपस्मरत्यभीक्ष्णं सङ्कल्पः॥ 6॥

तद्द तद्वनं नाम तद्वनमित्युपासितव्यम् ।

स य एतदेवं वेदाभि हैनं सर्वाणि भूतानि संवाञ्छन्ति॥ 7॥

उपनिषदं भो ब्रूहीति।

उक्तात उपनिषत्।

ब्राह्मीं वाव त उपनिषदमब्रूमेति॥ 8॥

तस्यै तपो दमः कर्मेति प्रतिष्ठा।

वेदाः सर्वाङ्गानि सत्यमायतनम्॥9॥

यो वा एतामेवं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति

प्रतितिष्ठति॥10॥

॥ इति चतुर्थः खण्डः॥

## ॥ इति तलवकारोपनिषत्॥

भा- उमा सा सम्यगाचष्ट तस्मै विष्णुं परं पदम्।

यस्माद् ब्रह्मा च वायुश्च शेषवीन्द्रौ शिवस्तथा॥

सभार्या गर्विणो नासन् सुरेभ्यस्तेऽधिकास्ततः।

इन्द्रस्तु प्रथमं ब्रह्म व्यजानात्तेन तूत्तमः॥

दक्षादिभ्यस्तथा कामः स ज्ञातुं पूर्वमुक्तवान्।

दक्षो बृहस्पतिश्चैव मनुः कामात्मजस्तथा॥

सूर्याचन्द्रमसौ धर्मो वरुणश्चोचुरोमिति।

नासिक्यवायुरग्निश्च प्रथमं तदपश्यताम्॥

| |
|---|
| सर्वदेवाधिकास्तस्माद् एते देवाः प्रकीर्तिताः।<br>एतेभ्यश्चेन्द्रकामौ तु ताभ्यां ब्रह्मादयोऽधिकाः॥ |
| एतेषामवमो वह्निः परमो विष्णुरुच्यते।<br>अन्तराले स्थितास्त्वन्ये ब्रह्माद्याः पूर्वमीरिताः॥ |
| अग्निः पश्चाद्यजानात् तदिन्द्रवाक्यात् ततोऽवमः।<br>तस्माद्विष्ण्वभिसम्बन्धात् पारावर्यं सुरेष्विदम्॥ |
| व्यद्योतयद्विद्युदादीन् कपिलाख्यस्तु यो हरिः।<br>अक्ष्णोर्निमेषणं कृत्वा यः शेते क्षीरसागरे॥ |
| स एवैकः परं ब्रह्मेत्येवं तस्योपदेशनम्।<br>अधिदैवे तथाऽध्यात्मे यं मनो गच्छतीव च॥ |
| सम्यङ् न गच्छति क्वापि मनो येन स्मरत्यपि।<br>सोऽनिरुद्धाख्य ईशेशः परं ब्रह्मेति कीर्त्यते॥ |
| स विष्णुस्तद्वनं नाम ततत्वाद्वननीयतः।<br>एवमेनं तु यो वेद भवेत् सर्वैरपेक्षितः॥ |
| एतत् श्रुत्वा हरोऽपृच्छद् ब्रह्माणं पुनरेव तु।<br>विद्याकारं मम ब्रूहीत्युक्तो ब्रह्माऽऽह तं पुनः॥ |
| विद्यावेद्यं तव प्रोक्तमास्थानं ते वदाम्यहम्।<br>तपोदमस्वधर्मेषु ये स्थितास्तेषु तिष्ठति॥ |
| विद्या स्थानानि तस्यास्तु वेदा अङ्गानि निर्णयः। |

वेदैतामेवमखिलां यो विष्णौ प्रतितिष्ठति॥ इत्यादि ब्रह्मसारे॥

विद्युतः सूर्यादिप्रकाशान्। आसमन्ताद्व्यद्युतत् प्राकाशयत्।

'यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्॥' इति वचनात्।

'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति च।

न्यमीमिषत् आ समन्तान्निमीलिताक्षमभवत्।

'स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि।

अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मा निशि सुप्तशक्तिषु॥' इति वचनात्

पूर्णत्वाच्च – आः। अभीक्ष्णं सङ्कल्प इति मनसो विशेषणम्। सङ्कल्पमित्यर्थः। स प्रतिष्ठां सायतनामुपनिषदं ब्रूहीत्युक्ते सम्यगेव मयोपनिषत्स्वरूपमुक्तम्। तत्र वक्तव्यं नास्ति। तपो दमः कर्म च विद्यायाः प्रतिष्ठा – तद्वत्सु विद्या प्रतितिष्ठतीत्यर्थः। सत्यमिति मीमांसा।

'निर्णीयते यतः सम्यगिदं सत्यमिति स्फुटम्।

श्रुतिस्मृत्युदितं सर्वं व्यक्तं मीमांसयैतया।

सत्यमित्युच्यते तस्मान्मीमांसा ब्रह्मनिश्चयः॥' इति शब्दनिर्णये

'ऋग्यजुः सामाथर्वाख्याः पञ्चरात्रं च भारतम्।

मूलरामायणं चैव पुराणं भगवत्परम्॥

वेदा इत्युच्यते सद्भिः शिक्षाद्यं स्मृतयस्तथा।

अङ्गानि सत्यं मीमांसा तद्विद्यायतनं त्रयम्॥' इति विद्यानिर्णये।

यश्चिदानन्दसच्छक्तिसम्पूर्णो भगवान् परः।

नमोऽस्तु विष्णवे तस्मै प्रेष्ठाय प्रेयसां च मे॥

## ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं तलवकारोपनिषद्भाष्यम्॥

## शान्तिमन्त्रः

आप्यायन्तु ममाङ्गानि वाक् प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि। सर्वं ब्रह्मौपनिषदम्। माऽहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोत्। अनिराकरणमस्त्वनिराकरणं

मेऽस्तु। तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु॥ ॐ शान्तिश्शान्तिश्शान्तिः॥

॥ मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा॥

॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डानम्॥